श्री शंकराष्टकं

श्री शंकराष्टकं

शीर्षजटागणभारं गरलाहारं समस्तसंहारं |
कैलासाद्रिविहारं पारं भववारिधेरहं वंदे || 1 ||

चंद्रकलोज्ज्वलफालं कंठव्यालं जगत्त्रयीपालं |
कृतनरमस्तकमालं कालं कालस्य कोमलं वंदे || 2 ||

कोपेक्षणहतकामं स्वात्मारामं नगेंद्रजावामं |
संसृतिशोकविरामं श्यामं कंठेन कारणं वंदे || 3 ||

कटितटविलसितनागं खंडितयागं महाद्भुतत्यागं |
विगतविषयरसरागं भागं यज्ञेषु बिभ्रतं वंदे || 4 ||

त्रिपुरादिकदनुजांतं गिरिजाकांतं सदैव संशांतं |
लीलाविजितकृतांतं भांतं स्वांतेषु देवानां वंदे || 5 ||

सुरसरिदाप्लुतकेशं त्रिदशकुलेशं हृदालयावेशं |
विगताशेषक्लेशं देशं सर्वेष्टसंपदां वंदे || 6 ||

करतलकलितपिनाकं विगतजलाकं सुकर्मणां पाकं |
परपदवीतवराकं नाकंगमपूगवंदितं वंदे || 7 ||

भूतविभूषितकायं दुस्तरमायं विवर्जितापायं |
प्रमथसमूहसहायं सायं प्रातर्निरंतरं वंदे || 8 ||

यस्तु पदाष्टकमेतद्ब्रह्मानंदेन निर्मितं नित्यं |
पठति समाहितचेताः प्राप्नोत्यंते स शैवमेव पदं || 9 ||

इति श्रीमत्परमहंस स्वामिब्रह्मानंदविरचितं श्रीशंकराष्टकं |